# तृतीयोऽध्यायः

# वैदिकलोकतन्त्रस्य स्वराज्यवाद

# वैराज्यवादश्च

वैदिकराजनीतिशास्त्रे विविधप्रकारका: शासनव्यवस्था: परिलक्ष्यन्ते। संहितासु न केवलमेकनायकत्वस्य राजतन्त्रस्य चावस्थिति: दृश्यते अपितु विविधप्रकारकाणां गणतान्त्रिकशासनव्यवस्थानामपि दिग्दर्शनं प्राप्यते। ग्रामशासनाद राष्ट्रियाऽन्तराष्ट्रियपर्यायस्य शासनव्यवस्थानांसंसदीय-युक्तराष्ट्रियशासनव्यवस्थान।म।प चाङ्कुराणि परिदृश्यन्तेऽत्र। किन्तु अस्य अङ्कुरस्य पूर्ण: विकाश: ब्राह्मणसाहित्ये एव परिलक्ष्यते। वैदिकराजनीतिशास्त्रस्य गवेषका: विविधजनपदानांमध्ये संघटित-संघर्षात् विविधानां शासनप्रकारकाणां सृष्टि: इति वक्तुमिच्छन्ति।[१]

शासनस्योद्भव-विकाशविषये वैदिकशास्त्रेषु वैदिकोत्तरशास्त्रेषु च बहूनि विवरणानि समुपलभ्यन्ते। तत्प्राचीनशास्त्रोपलब्धा: राजनैतिकसिद्धान्ता: प्रशासनिकसंस्था: न्यायदण्डविधानादि-नीतय: राजनीत्यामपि स्व भूमिकां प्रकटयन्त परिलक्ष्यन्ते। शासनस्योद्भवविषये प्राच्यपाश्चात्योभयपण्डिता: स्वाभिमतं प्रकटयन्ति। पाश्चात्यविद्वद्भि: प्रशासनस्योद्भवविषये सिद्धान्तचतुष्टयमङ्गीकृतम्। ते च सिद्धान्ता: वैदिकराजनैतिकभावदर्शनेनसह पूर्णत: सम्बन्धिता: विद्यन्ते। ते:सिद्धान्ता:१.दैवीसिद्धान्त: २.अनुबन्धसिद्धान्त: ३.शक्तिसिद्धान्त: ४.विकाशसिद्धान्तश्चेति । पाश्चात्यचिन्ताधारायामपि एतेषां चतुर्सख्यकसिद्धान्तानामतिरिक्तौ अन्यौ द्वौ सिद्धान्तौ स्त: - वैराज्यस्य सिद्धान्त: अराजकस्य सिद्धान्तश्च।[२] एते सिद्धान्ता:किञ्चित् विश्लेषणपूर्वकं अत्र अस्माभि: आलोच्यन्ते-

१. **दैवीसिद्धान्त:** -प्राचीनभारतीयपरम्परावत् पाश्चात्यराजनैतिकचिन्तनेऽपि राज्ञ: उत्पत्ति विषयेदैवीतत्वं स्वीक्रियते। जननायकंनरदेवतारूपेण स्वीकरणमेव दैवीसिद्धान्तस्य मूलतत्वम्।[३] वस्तुत: जननायक: तस्य सत्यनिष्ठ-सदाचार-पवित्रता-सततादियुक्तेन जीवनेन दैवत्वं लब्धुं शक्नोति। यतोहि सत्यनिष्ठ: दयावान् जन: कदापि अत्याचारीव्यभिचारी भ्रष्टाचारी च भवितुं नार्हतीति विदुषां मतम्।[४] सद्धर्मसमन्वितकार्येण प्रजावात्स्यलत्वं हि

तस्य प्रमुखं कार्यसूत्रम्।कस्यचित् जननायकस्य एतादृशोदारभावनया हि स दैवीगुणमवाप्य नृपत्वेन स्वीक्रियते।

संहितासु राज्ञ: देवत्वविषये अनेकानि तथ्यानि उपलब्धानि। ऋकसंहितायां जननायक: “अमृते लोकस्य”[५]इति वचनै: स्वर्गलोकस्य निवासी इति निगद्यते।[६] यजुर्मन्त्रे जननायक: ब्रह्मा-सविता-रूद्र-वरूणेन्द्रादि-देवतानां स्वरूपरूपेण वर्णनस्योदाहरणं संप्राप्यते।[७] अभिषेकात्पूर्वं स: जननायक:सामान्यजनोभवति किन्तु राज्याभिषेकसमारोहस्यानुष्ठानेन दीक्षाप्रदानेन च दैवत्वगुणमवाप्नोति।[८] ब्राह्मणवाक्ये दीक्षालब्धस्य जननायकस्य विष्णुत्वेन दैवत्वेन वा परिवर्तनस्य वर्णनमपि श्रूयते।[९] प्राप्यते संहितायामपि- “विष्णो: शर्मासि”[१०]इति। अर्थात् याज्ञिकदीक्षाग्रहणेन स: वैष्णवत्वं प्राप्नोति। वैष्णवत्वे प्राप्ते सति स: अग्नीन्द्र-सोम-मित्र-वरूण-यम-सूर्यप्रभृति-देवतानामङ्शधारणं करोति।[११] अर्थात् दैवीगुणानां विभूतिनामाधानेन जननायकस्य दैवत्वे परिवर्तनं भवतीति आशय:। अस्मात् दैवीसिद्धान्तात् राज्यशासनस्य उद्भवविषये यहुदीसाहित्येषु वहूनि उदाहरणानि उपलभ्यन्ते।[१२] मनुनापि प्रशासकस्य दैवत्वं स्पष्टरूपेण स्वीकृतम्।[१३]

२. **अनुबन्धसिद्धान्त:** -राज्यसंस्थाया: उद्भवे विकाशे च अनुबन्धसिद्धान्तस्य गुरूत्वपूर्णा भूमिका परिलक्ष्यते। यदा समाजव्यवस्था प्रकृतेरधीना आसीत्तदा जना: पशुवदाचरन्ति स्म। अनन्तरं ते जना: परस्परंसमालोच्य वीरपुरूषमेकं विशेषकारणसापेक्षं समयसापेक्षं च जननायकरूपेण अवृण्वन्। तस्मात् स्वाधिपतिवरणेन नियमानुकरणेन च: राज्यव्यवस्थाया: उत्पत्ति: इत्येवानुबन्धसिद्धान्तस्य भाव:। सप्तदशशताब्दे: हैब्स-लक्-रूसोप्रभृतिभि:अस्यानुबन्धसिद्धान्तस्य भूरि व्याख्या-विश्लेषणं कृतम्। अस्य सिद्धान्तस्य प्रभावेनैव यूरोपखण्डे राज्यसंस्थादीनामुद्भव: तेषां राजनैतिकसंघट्टन-कर्तव्याधिकारादीनाच्च विकाशो जात इति विदुषां मतम्।[१४]

वैदिकसंहितासु अस्य सिद्धान्तस्य बहूनि उदाहरणानि प्राप्यन्ते। जननायकस्य वरणसमये वैदिकराज्याभिषेकानुष्ठाने प्रतिज्ञाग्रहणस्य विधानमस्माभि: पूर्वस्मिन्नध्याये आलोचितम्। यत्र जननायक:‘धृतव्रत’[१५]इति रूपेणोपस्थापित:। सायण-उवट-महीधरै: ‘धृतव्रत’पदस्य व्याख्यायां प्रतिज्ञापालनस्य संकल्पं गृहीतो जन इति स्वीकृतम्।[१६] यजुस्संहितायां जननायकस्याभिषेकानुष्ठाने कृषिकार्यस्य विकाशार्थं जनकल्याणार्थं राष्ट्रोन्नतेर्निमित्तं प्रजानां भरणपोषणार्थं च तस्यवरणमिति व्याख्यातम्।[१७] कुत्रचित्पुन: सर्वविधदु:खात् प्रजाणां संरक्षणपूर्वकं[१८] ज्ञानस्योत्कर्षेण[१९] ताम् योगक्षेमं[२०] प्रापयितुमेव तस्य वरणमिति प्रोक्तम्। जननायकोऽपि तानि सर्वाणि कार्याणि सुचारुरूपेण परिपालनार्थं प्रतिज्ञाबद्धो भवति।[२१] अस्याभिषेकसमारोहे राज्यस्थ-विशिष्टजनानांसमीपस्थ-राजानां ग्रामपुरयो: प्रतिनिधिजनानामुपस्थिते: प्रमाणम् उपलभ्यते।[२२] एवं प्रकारेण समग्रजनगणानां सन्मुखेअस्यानुबन्धग्रहणस्य परम्परा प्राचीन वैदिककालादेव प्रारब्धा।

परवर्तिसाहित्ये अस्य राज्याभिषेकस्य विस्तृतप्रमाणानि उपलभ्यन्ते।[२३] अनुबन्धस्य पालनपूर्वकं प्रजा: जननायकं पदच्युतं कर्तुं दण्डप्रदातुं च शक्नुवन्ति स्म।

३. **शक्तिसिद्धान्त:**– शक्ते: प्रचारभावनया आधिपत्यविस्तारभावनया वा शक्तिप्रदर्शनेन राज्यव्यवस्थाया: उत्पत्तिमकल्पयत्। कोऽपि पुरूष: सामदामादिनीतिप्रयोगेन अन्यस्योपरि स्वाधिकारं स्थापयति, बलप्रयोगेन आधिपत्यमवाप्नोति इत्येव शक्तिसिद्धान्तस्य भाव:। अस्य सिद्धान्तस्य सर्वप्रथमसूचना संहितासु उपलभ्यते। आर्य-अनार्ययो: युद्धं,[२४] वैदिकदेवताभि: वृत्रवधेन प्रजासंरक्षणं[२५] शत्रुजयस्य[२६] च वर्णनमस्माभि: श्रुतम्। शत्रूसेनानां संहारपूर्वकं युद्धजयादनन्तरं एक: नृपति: महीपति इत्यनेन आख्यायते यथा इन्द्र महेन्द्रेति[२७] पदेन भूषित:।

ऐतरेयब्राह्मणस्य आख्यानैकस्मिन्[२८] देवासुरसंग्रामे पराजिता: देवता: पराजयस्य

कारणविश्लेषणादनन्तरं नृपतेरभाव: एवेति परिज्ञाय सोमदेवं जननायकं विनिर्माय असूरान् परास्तकरणस्य प्रमाणं वर्णितमस्ति। वस्तुत: जननायकस्य वरणे शत्रुवध: प्रजापालनमेव प्रमुखमुद्देश्यमासीत्। शक्तिप्रदर्शनेन अन्यस्योपरि स्वाधिकारस्थापनेन च जननायक: प्रजा: संरक्षयति। अस्य जननायकस्य शक्तिप्रदर्शनादेव राज्यसंस्थाया: उद्भवमिति कल्पनं आधुनिकराजनीतिज्ञा: अपि स्वीकुर्वन्ति।

४. **विकाससिद्धान्त:** – राज्यसंस्थाया: उत्पत्ते विकाससिद्धान्तस्य गुरूत्वपूर्णभूमिका परिदृश्यते। सामाजिकप्राणित्वेन मनुष्या: परिवारव्यवस्थायां विकशिता:। परिवारोऽयं परवर्तिपर्याये क्रमश:वंश-कुल-ग्राम-व्रातादिरूपेण विकसितो भूत्वा राज्यस्योत्पत्ति: जात:। अयमेव भाव: विकाससिद्धान्तत्वेन ख्यात:।[२९] अस्य सिद्धान्तस्य प्रमाणरूपेण गार्हपत्याहवनीयादि-वैदिकयाज्ञिकरीतिमुद्धर्तुं शक्यते। अत्र गार्हपत्याहवनीयादिशब्दाभ्यां विज्ञायते यत् विकाशपरम्परायामादौ सुदृढसामाजिकसंस्थासमुत्पन्ना:। पश्चात् तस्याधिकारी संचालको वा समभवत्। यथा गार्हपत्यस्य गृहपति:। अयमेव गृहपति: शासननियन्त्रणार्थं ग्राम-राज्य-जनपदादिशासनस्य प्रधानोपजीव्यमस्ति इति गवेषकाणां मतम्।[३०]

पाश्चात्यविद्वद्भि: प्रतिपादितानां चतुर्संख्यकानां सिद्धान्तानां उपस्थापनपूर्वकं संहितादिग्रन्थे तेषां वर्णनमालोचना च अस्माभि: अत्रोपस्थापिता। इतोऽपि समाजस्योत्थानविषये स्वीकृतसिद्धान्तेषु अराजक: वैराज्यश्चेति सिद्धान्तद्वयस्य विशेष: प्रसिद्धि: लभ्यते।[३१] अस्य अराजकसिद्धान्तस्यैव ग्रहणपूर्वकं पूर्वोक्तानां चतुर्सिद्धान्तानां सृजनं कल्पितम्। तदितरसिद्धान्तस्तु वैराज्यमिति। वस्तुत: वैराज्यव्यवस्था अराजकादनन्तरं राज्यात्पूर्वस्य चावस्था विद्यते यत्र जनानां चारित्रिकपतनमवलोक्य विद्वद्भिर्दुष्टान् नियन्त्रितुं राज्ञा विना प्रशासनविधि प्रणिता। अस्य प्रशासनविशेषस्यादिस्वरूपे शासक: शासितस्याभाव: परिलक्ष्यते किन्तु प्रशासनिकविधेरवस्थिति: तु संप्राप्यते। अयं वैराज्यसिद्धान्त: पूर्णत: लोकतान्त्रिकं आसीदिति प्राच्यराजनैतिकपण्डितानां मतम्।[३२] किन्तु कालक्रमात् समाजव्यवस्थाया:

परिवर्तनात् अस्य वैराज्यस्योत्कृष्टपरम्परा विश्रृङ्खला जाता। संस्कृतसाहित्येषु वर्णितं मात्स्यन्यायत्वेनोल्लेखितमाख्यानं अस्यैव विसृङ्खलसमाजव्यवस्थाया: उदाहरणमिति समालोचकानामभिमतम्।[३३] परवर्तिसमये सुयोग्यवीरपुरूषमेकं जननायकत्वेन चित्वा समाजव्यवस्था नियन्त्रिता इत्युक्तं पूर्वमेव। एवं प्रकारेणैव शासनव्यवस्थाया: राज्यव्यवस्थाया: चोत्पत्ति: कल्पितेति।

राज्यसंस्थाया: उद्भवस्य समान्तरालरूपेण प्रशासनस्याऽपि उद्भवो जात:। समयस्य गतिशीलतायां जनानां राजनैतिकचिन्तनानां अपि सम्प्रसारणं परिलक्ष्यते। तदा तत्कालीनराजनीतौ विविधप्रकारकाणां शासनविधानानां सृजनं जातम्। यथा पाश्चात्यराजनीतौ अराजकतावाद: नाजीवाद: फैसीवाद: मार्क्सवाद: सामन्तवाद: एकनायकतन्त्रं जनतन्त्रमित्यादीनां विविधराजनैतिकदर्शनानामुत्पत्ति: परिलक्ष्यते। तद्वत् प्राच्यराजनीत्यामपि साम्राज्य-वैराज्यादिनैकविधानां शासनप्रकारकाणामाविर्भावो जात:। एतेषां शासनप्रकारकाणां नामानि संहितामन्त्रेष्वपि परिलक्ष्यन्ते। परन्तु तेषां शासनविधानानां स्वरूपविश्लेषणं प्रायश: सूक्ष्मरूपेण आंशिकरूपेण वा उपलभ्यते। इह चतुर्षु संहितासु उपलब्धानां विविधानां शासनप्रकारकाणाम् एका सूची उपस्थाप्यते -

| ऋ.सं. | यजु (शु) | सा.सं. | अ.सं. |
|---|---|---|---|
| वैराज्यम्[३४] | वैराज्यम्[३५] | वैराज्यम्[३६] | वैराज्यम्[३७] |
| राज्यम्[३८] | राज्यम्[३९] | | राज्यम्[४०] |
| साम्राज्यम्[४१] | साम्राज्यम्[४२] | साम्राज्यम्[४३] | साम्राज्यम्[४४] |
| स्वराज्यम्[४५] | स्वराज्यम्[४६] | स्वराज्यम्[४७] | स्वराज्यम्[४८] |
| अधिराज्यम्[४९] | | | |
| अधिपत्यम्[५०] | अधिपत्यम्[५१] | | अधिपत्यम्[५२] |
| जानराज्यम्[५३] | जानराज्यम्[५४] | | जानराज्यम्[५५] |

ऋक्संहितोपलब्ध-अधिराज्यनामधेयस्य शासनप्रकार: परवर्ति-संहिताग्रन्थे तथा अन्य साहित्येऽपि नैवोपलभ्यते। सामसंहितायां आधिपत्यजानराज्ययो: अभाव: प्रत्यक्षीक्रियते। तदितरशासनविधय: प्रत्येकसंहितासु समानरूपा: वर्तन्ते। परन्तु प्रत्येकेषु संहितासु पूर्वोक्तानां शासनप्रकारकाणां स्वरूपवर्णनं समाना: नैव परिलक्ष्यन्ते। संहिताग्रन्थेषु स्फोटरूपेण उपस्थापिता: ता: शासनप्रकारा: सायण-उवट-दयानन्दादिभाष्यकाराणां भाष्यानुसरणपूर्वकं निरूक्तकारस्य नैरूक्त्यनुसरणपूर्वकं ब्राह्मणवाक्यानुसरणपूर्वकं च तेषां स्वरूपोपस्थापनस्य प्रयास: वैदिकराजनीते: विश्लेषयितार: अकुर्वन्त यच्च तेषां ग्रन्थेसु परिदृश्यन्ते।

तासां प्रशासनिकव्यवस्थानां परवर्तिब्राह्मणसाहित्ये भौज्य-पारमेष्ठ्य-महाराज्यादित्रिविधशासनप्रकारकाणां स्वीकारपूर्वकमाहत्य अष्टप्रकारकाणां शासनविधानानामुत्थानं परिलक्षितम्।[५६] किन्तु जानराज्यमिति प्रशासनव्यवस्था या पूर्णत: लोकतान्त्रिकपद्धतिरासीत् तस्या: वर्णनं ऋग्वेदीयब्राह्मणे नैवोपलभ्यते किन्तु शतपथब्राह्मणे[५७] तस्योपस्थापनं परिलक्ष्यते। एतेषु शासनविधिषु राजनैतिकचिन्तनस्य विविधा: भावधारा: विराजन्ते। यत्र च स्वराज्य-वैराज्य-जानराज्यानां विस्तृतविवरणं प्राप्यते इति पण्डितानां मतम्।[५८]

संहितासूपलब्धशासनविधय: ब्राह्मणकाले एकस्य स्थानविशेषस्य शासनविधिरूपेण प्रचलिता: आसन्। यतोहि ऐतरेयब्राह्मणे राजसूययज्ञस्यवर्णनप्रसंगे अष्टप्रकारकाणां शासनव्यवस्थानां उल्लेखादनन्तरं तत् तत् शासनव्यवस्थया प्रशासितानां जनपदानां उल्लेखंश्चोपलभ्यते।[५९] तासु प्रत्येकासु शासनव्यवस्थासु विध्यनुसारेण शासकस्योपाधिप्रदानस्य व्यवस्था एवं उपाधिग्रहणपूर्वकं प्रशासनिककार्यसम्पादनस्य च विधानं प्राप्यते। अत्र ऐतरेयब्राह्मणोपवर्णितानांमष्टप्रकारकाणां शासनविधानानां कृते निर्धारितं यज्ञानुष्ठानं तैरवश्यमेव करणीयमासीत्। याज्ञिकविधिना कमपि सुयोग्यपुरूषविशेषं जननायकत्वेन व्रियते स्म। तेन वृतेन पुरुषेण दीक्षाग्रहणादनन्तरं शासनविध्यनुसारेण

शासकस्योपाधिं संप्राप्य प्रशासनिककार्यसम्पादनस्य विधानं प्रारभ्यते। इह ऐतरेयब्राह्मणोपवर्णितानामष्टप्रकारकाणां शासनविधानानां मुख्यजनपदः शासनाधिकारी-शासकस्योपाधिः सम्पादनीयस्य यज्ञस्य प्रकारः जनपदस्यावस्थितिश्च विद्वद्भिरनुसृत्य[६०] कोष्ठकमध्ये उपस्थाप्यते -

| शासनविधानम् | सम्पादनीय यज्ञः | शासकस्योपाधिः | प्रदेशानामवस्थितिः | मुख्यजनपदानि |
|---|---|---|---|---|
| वैराज्यम् | ---------------- | विराट् | उत्तरदिक् | उत्तरकुरू उत्तरमद्रम्[६१] |
| भौज्यम् | ---------------- | भोजः | दक्षिणदिक् | कच्छ-अन्धक-वृष्णिः[६२] |
| साम्राज्यम् | वाजपेयः[६३] | सम्राट् | पूर्वदिक् | मगध-कलिंग-वंगाः |
| स्वराज्यम् | सर्वमेधः[६४] | स्वराट् | पश्चिमदिक् | सुराष्ट्र-कच्छ सौवीराः |
| राज्यम् | राजसूयः | राट् | मध्यदेशः[६५] | कुरुपाञ्चालः |
| पारमेष्ठ्यम् | ---------------- | परमेष्ठिः | उर्धदिक् | ,, |
| महाराज्यम् | ---------------- | महाराजा | ,, | ------------------ |
| आधिपत्यम्[६६] | --------------- | अधिपतिः | ,, | ------------------ |

## स्वराज्यशासनम्

स्वराज्यमिति शासनव्यवस्था पूर्णतया लोकतान्त्रिकमासीत्। अत्र जनसाधारणानां प्रयोजनाधिकारोन्नतेर्विषये विशेषं गुरूत्वं प्रदीयते। स्वराज्यमिति शब्दस्य व्याख्यायां सायणाचार्येण ऐतरेयब्राह्मणस्य ३५.६ तमस्य मन्त्रस्य विश्लेषणसमये प्रोक्तम् - "स्वातन्त्र्येण राजत्वमिति स्वराज्यम्" अर्थात् स्वातन्त्र्येण स्वेच्छया आत्मतत्वस्य प्रकाशपूर्वकं राजत्वं शासनसञ्चालनं वेति स्वराज्यशासनम्।[६७] अस्य स्वराज्यव्यवस्थायाः प्रचलनं सुराष्ट्र-कच्छ-

सौवीरादिषु प्रदेशेषु[६८] निम्नवर्गीयाणां जनजातीनां मध्ये[६९] वा परिलक्ष्यते। ऐतरेयब्राह्मणानुसरणेन तत् पश्चिमभागं किञ्चित् मरूस्थलं किञ्चित् वनाञ्चलं चासीत्।[७०] तत्र नीच्य-अपाच्यजनानां निवास: इति वर्ण्यते।[७१] अस्य शासनस्याधुनिकनामस्ति स्वतन्त्रप्रशासनव्यवस्था। स्वतन्त्रेति शब्देन अन्यस्योपरि अनिर्भरशीलता, स्वयमेव स्वस्य तन्त्रनिर्धारक-प्रभृति-अर्थं प्रकटीकरोति। स्वतन्त्रमिति शब्दे स्व इति पदं स्वस्यार्थे आत्मस्यार्थे वा संप्रयुक्तम्। यत्र तन्त्र (शासनव्यवस्था) निर्धारणे रूपायणे च स्वस्य आत्मन: (सर्वेषां जनानां व्यक्तिगतसमर्थनं) संयोजनं भवति तदेव स्वतन्त्रस्य वास्तविकोऽर्थ:।

वैदिकसंहितासु अस्य स्वराज्यशासनस्य अनेकानि प्रमाणानि परिदृश्यन्ते। कुत्रचित् स्वराज्यस्य नमनं[७२] वर्णितमस्ति चेत् अन्यत्र कुत्रचित् स्वराज्यस्योत्तराधिकारिजनस्य स्वराजस्य पूजनम्।[७३] वैदिकर्षय: अस्य स्वराज्यस्य प्रतिनिधिं स्वराजं विविधाधिकारप्रदानार्थं सर्वदा सचेष्टा: दृश्यन्ते।[७४] अस्य स्वराज्यमितिपदस्य ऐतरेयब्राह्मणे स्वाराज्यमिति पाठं श्रूयते। किन्तु अनयो स्वराज्य-स्वाराज्येतिपदद्वयो: न परिलक्ष्यते तावान् भेद:। अस्मिन् प्रसंगे 'वैदिकस्वराज्यशासन' इति शीर्षके ग्रन्थे सातवलेकरमहोदयेन भणितम् - "इत्यत्र स्वस्योपरि अथवा स्वस्यपक्षस्योपरि शासनाधिकार- प्रदानार्थं काऽपि स्पर्धा न वर्तते, प्रत्युत: स्वं प्रत्येकमतदातां वा परिशुध्यर्थं पूर्णार्थं वोपदिश्यते। इमं भावं प्रकटयितुं स्वस्योपरि दीर्घमात्रां दत्वा स्वाराज्येति पदं वेदेनैव विनिर्मितमिति"।[७५] एवमेव प्रमाणीयते यत् स्वराज्यादपि स्वाराज्यस्याधिक: लोकतान्त्रिकता विद्यते इति। स्वराज्यशासने शासनाधिकारीं स्वराट्[७६] इत्यनेन प्रोच्यते। वैदिकसाहित्येषु अस्य स्वराट् इति पदस्यापि बहुवारं पुनरावृत्ति:[७७] दरीदृश्यते। तैत्तिरीयब्राह्मणे अस्य स्वराज्यस्यार्थ: समपर्यायाणां जनानां नायक:, श्रेष्ठं पदं प्राप्तं जनं चाभिहितम्।[७८]वैदिकराजनीतिज्ञैरपि तेषां समानाधिकारिणां प्रतिनिधिकर्तारं स्वराट् इत्युक्तम्।[७९] समपर्यायेषु श्रेष्ठं समानाधिकारिणां प्रतिनिधि: इत्यादि पदेन जनसाधारणेषु श्रेष्ठोऽग्रगण्यजन: ज्ञातव्य:।

**स्वराज्यस्य स्वरूपम्**

वैदिकसंहितासु स्वराज्यप्रशासनस्य अनेकानि प्रमाणानि समुपलभ्यन्ते। ऋकसंहितायां प्रथममण्डलस्य अशीतितमं सूक्तं स्वराज्यसूक्तत्वेन प्रसिद्धमस्ति। अस्य सूक्तस्याधारेणैव अन्येषां संहिता-ब्राह्मणवाक्यानां प्रमाणपुरस्सरं स्वराज्यव्यवस्थाया: स्वरूपवर्णनस्य प्रयास: क्रियते-

स्वतन्त्रराज्यमेव स्वराज्यम्। अत: स्वराज्यस्य स्वरूपे लोकतान्त्रिकवैशिष्ट्यानामवस्थिति: प्रत्यक्षीक्रियते। स्वराज्यप्रशासने शासकेन स्वस्य राज्याभ्यन्तरे परिभ्रमणं कृत्वा प्रजाजनानामभावाभियोगं प्रत्यक्षीकृत्य[८०] तस्य यथावत् समाधानार्थं व्यवस्थाग्रहणस्य प्रमाणं समुपलभ्यते। उद्योगे व्यापारे च विशेषोन्नते: चित्रं मन्त्रेषु प्रतिफलितम्।[८१] ऋक्संहिताया: एकस्मिन्मन्त्रे स्वराज्यशासनस्य स्वरूपमुपस्थाप्यते-

"आ यद् वामीयचक्षसा मित्रं वयं च सूरय:

व्यचिष्टे बहुपाय्ये यतेमहि स्वराज्ये॥"[८२]

वैदिकराजनीतिशास्त्रस्य विश्लेषकेन कपिलदेवद्विवेदीमहाभागेन[८३] 'व्यचिष्टे-बहुपाय्ये' इत्यनयो: शब्दयो: व्याख्यानन्तरं स्वाभिमतं प्रकटयन्नुक्तं - स्वराज्यसंरक्षणस्योत्तरदायित्वं व्यक्तिविशेषस्योपरि न भवति तत्तु स्वराज्यस्थानां सर्वेषां जनानां दायित्वं वर्तते। सर्वेषां प्रयत्नेनैव स्वराज्यस्य संरक्षणं विकाश: संभवतीति।

वस्तुत: व्यचिष्ठ इति पदं स्वराज्यस्य सूचकम्। सायणाचार्येण व्यचिष्ठ: इति पदस्यार्थ: अत्यन्तं विस्तृतमित्युक्तम्।[८४] सातवलेकरमहोदयेनापि अस्य शब्दस्य व्याख्यायां भणितम् - "विस्तृत: व्यापक: सर्वतोगामी; यत्र संकुचितानां भावनानामवस्थिति: न विद्यते, यत्र च शासका: धर्मानुचारिणां प्रत्येकजनसाधारणानां सुखार्थं सदैव प्रयत्नशीला: भवन्ति, जाति-

भाषा-सम्प्रदायमाध्यमेन यत्र पक्षपातो नैव परिदृश्यते, प्रत्येकेषु वस्तुषु ईश्वरस्यावस्थितिरिति विचिन्त्य यत् व्यवहारः परिदृश्यते तस्यैव उदारभावस्य नामास्ति व्यचिष्ठः इति"।[८५] अस्यां शासनव्यवस्थायां प्रत्येकजनसाधारणानां समाधिकारप्रदानस्य व्यवस्थासीत्। अत्र व्यचिष्ठस्य भावार्थं व्याख्यातुं कतिचित् विन्दवः उपस्थाप्यन्ते -

क) अधर्मस्य विनाशपूर्वकं धर्मस्य संस्थापनं व्यचिष्ठ इति शब्देन सूच्यते। अतः वैदिकर्षिभिरपि साधुजनानां संरक्षणम् असाधूनां कृते दण्डस्य व्यवस्था विहितासीत्।[८६]

ख) स्वराज्यशासनव्यवस्थामीश्वरीयकार्यत्वेन ग्रहणमपि 'व्यचिष्ठ' इति शब्दस्य भावः। अतः जगन्नियन्तुराशिर्वादमिति मत्वा सम्यक् प्रकारेण शासनं परिचाल्य अन्तिमे मोक्षस्य परिकल्पनं विधास्यतेऽत्र। एवं विधायाः शासनव्यवस्थायाः विनाशो न कदापि संभवतीति[८७]।

ग) सर्वं चराचरजगत् एकस्यैवेश्वरस्य अंशमिति विचिन्त्य सर्वेषु समभावस्य प्रकटीकरणमपि व्यचिष्ठः इति पदेन प्रकटीक्रियते।

'व्यचिष्ठः' इति पदस्य विश्लेषणादनन्तरं 'बहुपाय्यम्' इति पदमपि विश्लेष्यते। वस्तुतः "बहुभिः विविधैः जनैर्वा पाय्यं गन्तव्यं रक्षितव्यं वा इति बहुपाय्यम् इति सायणभाष्यम्"[८८]। अदादिगणस्य 'पा' धातु संरक्षणार्थे संप्रयुज्यते।[८९] अतः विविधैः जनैःप्रजावर्गैः वा संरक्षिता शासनव्यवस्थास्ति स्वराज्यशासनव्यवस्था। अस्याः शासनव्यवस्थायाः विषये काठकसंहितायां निगदितम् - "स स्वराज्यम् आगच्छत् स एष स्वराज्यो यज्ञ स्वराज्यं गच्छति य एतेन यजेत"[९०] इति। अर्थात् स्वराज्यमेव यज्ञमिति विचिन्त्य यः स्वराज्यरूप-यज्ञसम्पादनं करोति तेन तद्राज्यमवाप्यते। अत्र स्वराज्यं यज्ञरूपेणोपस्थापितमस्ति। यज्ञस्य देवपूजा-संगतिकरण-दानादिषु त्रिषु अर्थेषु[९१] संगतिकरणमिति अर्थस्यात्र ग्रहणं भवति। सर्वेषां

जनगणानां सन्मेलनपूर्वकं गतिशीलता-प्रापणं च संगतिकरणस्यार्थ:। अत: स्वराज्यशासनेन शासकशासितयो: सन्मिलितेन कार्येण उभयस्योन्नतेर्भाव व्यक्तिक्रियते।[१२]

## स्वराज्यस्य वैशिष्ट्यम्

१. स्वराज्यशासनमपराधीनत्वमिति सायणवचनम्।[१३] शासनकार्ये नीतिनिर्धारण दण्डविधाने च सर्वे जना: स्वाधीना:[१४] परिलक्ष्यन्ते।

२. स्वराज्यस्था: सर्वेजना: शिक्षा-दीक्षासु,[१५] धन-सम्पत्सु:, विवेक-बुद्ध्यादिष्वपि समपर्यायी भवेत्। तेषु समपर्यायेषु श्रेष्ठत्वं ज्येष्ठ्त्वं वा प्राप्तो व्यक्तिविशेष: स्वराज्यस्याधिकारीनिमित्तं व्रीयते।[१६]

३. स्वराज्यप्रशासनव्यवस्थायां जनसाधारणानामिच्छाकाङ्क्षां परिलक्ष्य शासनकार्यं परिचाल्यते।

४. स्वराज्यशासनव्यवस्था सर्वजनहितकारीति परिलक्ष्यते। यतोहि शिक्षाया: प्रचार: ज्ञानीजनानां सन्मानप्रदानं[१७] उद्योगादीनां नियोजनं व्यापारादिषु[१८] च प्रशासनिकसाहाय्यप्रदानं स्वराज्यस्य वैशिष्ट्यम्।

५. स्वराज्यव्यवस्थायां शासक-शासितोभयवर्ग: स्वार्थरहितो भूत्वा सामग्रिककल्याणसाधनार्थे तत्परा: परिलक्ष्यन्ते।

## स्वराज्यस्य लोकतन्त्रता

यतोहि एकाधिकेन व्यक्तिसमूहेन पालितं संरक्षितं वा राज्यं स्वराज्यमिति प्रोक्तं, तद्राज्यस्य शासनकार्ये राज्यस्थानां सर्वेषां जनगणानां अंशग्रहणं तदा एव संभवति यदा ते प्रतिनिधिमूलकं व्यवस्थां प्रणयन्ति। अस्यां व्यवस्थायां जनगणेषु कमपि विशिष्टव्यक्तिमुपस्थाप्य वरणमाध्यमेन चयनमाध्यमेन वा शासनाधिकार: तस्मै प्रदीयते स्म।

लोकतन्त्रस्य स्वतन्त्रता-समानता-भ्रातृत्व-अधिकारकर्तव्यञ्चेति एतेषां चतुर्णां मूलभूतसिद्धान्तानामवस्थितिः[९९] स्वराज्यशासने प्रत्यक्षीक्रियते। शासकशासितयोः सम्पर्कमपि अतीवसरलं बन्धुत्वपूर्णं च परिलक्ष्यते। यथा जनसाधारणाः प्रतिनिधेराज्ञापालनं (राजाज्ञापालनम्) कुर्वन्ति तथैव प्रतिनिधिरपि प्रजानां हितार्थं सेवायां[१००] वा संलग्नो वर्तते। अतः जनप्रतिनिधि 'विशांपतिः' इत्यनेनापि सम्बोध्यते।[१०१]

**राजनैतिकचेतनायाः विकाशः**

स्वराज्यशासनव्यवस्थायां जनसाधारणेषुराजनैतिकसचेतनतायाः विकाशः परिलक्ष्यते। स्वराज्यशासने जनगणाः 'ईयचक्ष्यसा' अर्थात् व्याप्तदर्शनसम्पन्नाः दुरदर्शिनश्चासन्निति सायणभाष्यम्।[१०२] तेषां सामाजिकार्थिकनैतिक- राजनैतिकादिषु क्षेत्रेषु च पूर्णसचेतनता परिदृश्यते।

क) स्वराज्यस्थ-जनाः कल्याणकामिन आसन्निति परिलक्ष्यन्ते।[१०३]

ख) ते पुत-परोपकाररतजीवनं यापयन्ति स्म।[१०४]

ग) आध्यात्मिकदृष्ट्याः अपि ते ब्रह्मज्ञानिन[१०५] वैश्वानरसाधकाश्चासन्।[१०६]

घ) ते परस्परहितसाधनतत्पराश्चासन्।[१०७]

**नागरिकत्वप्रदानस्य नीतिः**

कस्यापि राष्ट्रस्य नागरिकत्वं लब्धुमपि केचनविशेषगुणाः आवश्यकाः भवन्ति। स्वराज्यव्यवस्थायामपि नागरिकत्वं प्राप्तुमावश्यकीयाः योग्यताः व्याख्यायन्ते इह -

क) कस्यापि देशविशेषस्य नागरिकत्वं प्राप्तुं तस्य देशविशेषस्य स्थायिवासिनः भवितव्यम्। नियमोऽयम् आधुनिकराजनीतेः प्रायेषु सर्वेषु लोकतान्त्रिकदेशेषु प्रत्यक्षीक्रियते। वैदिकार्यैः

एकवंशोत्पन्ननर: जन इति पदेनाभिहित:।[१०८] अत: तादृशोजन: 'सजात:'[१०९] 'सनाभि:'[११०] चेत्यपि उच्यते स्म। तादृशा: सजातीयजना: एव तस्य राज्यविशेषस्य नागरिका: भवन्ति स्म।[१११] तेभ्य: तद्राज्यस्य (स्वराज्यस्य) राजनैतिकाधिकारा: प्रदीयन्ते स्म। अत्रप्रयुक्तेन जनइतिपदेन न केवलमेकस्य वंशस्यैवोल्लेखोऽपितु विविधानां पञ्चजनानां[११२] अनुन्नतजातिजनजातीयवंशानामपि ग्रहणं भवति।[११३] स्वराज्ये न केवलं समजातीया: असमजातीयारपि परिगृह्णयन्ते नागरिकत्वेन।[११४] उक्तं च सायणेन "तव हवं स्वराष्ट्रप्रवेशविषयं पुनराह्वानां य: सजात: समानजन्मा:। समवल इति:"।[११५]

**ख)** द्वितीयत: नागरिका: स्वदेशप्रेमिण: भवेयु:। स्वराष्ट्रं मातृवदाचरणपूर्वकं राष्ट्रीयसम्पदां सश्रद्धेन संरक्षेदिति। वैदिकार्या: स्वधर्म-संस्कृतिसंरक्षणार्थं सदैव कटीवद्धा: दरीदृश्यन्ते। "उच्चावचीयान् भावान् स्वार्थाञ्च परित्यज्य परस्परं बन्धुत्वबन्धने बद्ध्वा संगठिता: सर्वे नागरिका: संकटापन्नाया: मातृभूमे: स्वकीयां जननीं रक्ष्यावत् निजप्राणानां चिन्तां विहाय रक्ष्यार्थमहर्निशं प्रतिबद्धा: भवेयुरिति" राष्ट्रप्रेमव्याख्या।[११६]

**ग)** स्वराज्यस्य नागरिकतां प्राप्त्यर्थं राजधर्मं प्रति जागरूकता तेजस्विता च भवितव्या।[११७]। विनाशकारितत्वानां विनाशनपूर्वकं सुश्रृङ्खलितजीवनयापनार्थं नागरिका: सदैव सज्जा: भवेयु:। जनप्रतिनिधिनिर्वाचनकाले प्रशासनिकक्षेत्रे च नागरिकै: सर्वदा राष्ट्रहितचिन्तनं कर्तव्यम्। [११८]

## स्वराज्यस्याधिपते: योग्यायोग्यत्वविवरणम्

स्वराजस्याधिपति: स्वराट् इति उच्यते। "स्वयमेव राजत इति वा स्वकीयमेव राज्यमस्येति वा स्वराट्"[११९] इत्यनेन वाक्येन सायणेनापि स्वराज्यस्याधिपतिविशेषं स्वराडिति अभिहितम्। तत् स्वराडिति पदमवाप्तुं सर्वमेधयज्ञसम्पादनस्य विधानं तत्कालीनेषु राजनैतिकसिद्धान्तेषु प्रत्यक्षीक्रियते।[१२०] स्वराट्-रूपेण वरणार्थं केषाञ्चित् योग्यतानामावश्यकता परिलक्ष्यते यथा -

१. सूर्यवत्तेजस्वी[१२१]-प्रसिद्धकीर्तिसम्पन्न:[१२२]-सुन्दर-आकर्षितादिगुणेन विभूषित: पुरूषविशेष: स्वराट् रूपेण वरणार्ह:।

२. स: पुरूषविशेष: धर्मात्माज्ञानीसर्वेषु भूतेषु समभावापन्न: परोपकारी च भवेत्।[१२३]

३. समपर्यायेषु व्यक्तित्वेषु श्रेष्ठतमो जन: स्वराट्-रूपेण व्रीयते।[१२४] तादृशो जन: स्वराज्यस्य नागरिको भवेत्। इतोऽपि नेतृत्वप्रदान-प्रजावत्सलता-धर्मज्ञाश्च स्वराजस्य अपरिहार्याणि गुणानि वर्तन्ते, येन स: समपर्यायेषु श्रेष्ठत्वं प्राप्नोतीति।

## स्वराट् इत्यस्य वरणविधानम्

शुक्लयजुस्संहिताया: "स्वराडस्युदीची दिङ्मरुतस्ते देवा अधिपतय: सोमो ..... "[१२५] इति मन्त्रस्य व्याख्यायां महीधर:[१२६] स्वयमेव प्रकाशित: विस्तारित: प्रगतेर्मार्गे अग्रेसर: पुरूषविशेषं स्वराडिति उक्तम्। परन्तु ऋकसंहिताया: एकस्मिन् मन्त्रे सायणेन स्वर्गस्य नृपतिं: स्वराट्-रूपेणाभिहित:।[१२७] अस्तु तावत्, अस्य स्वराज: वरणविधाने सर्वमेधयज्ञस्यानुष्ठानं विधीयते। अस्य यज्ञस्य सम्पादनेन दीक्षा ग्रहणेन च स: आत्मज्ञानी भवति येन स: स्वात्मनि प्रजात्मान: पश्येत्।'आत्मवत् सर्वभूतेषु....' इति भावनया स: प्रेरितो भवेत्।[१२८] अत: छान्दोग्योपनिषद्यपि "आत्मैवेदं सर्वमिति...... स स्वराट् भवति"[१२९]इत्यनेन वाक्येन आत्मज्ञानीपुरूषं स्वराडिति अभिहितम्। वस्तुत: आत्मज्ञानी सर्वत्र समदर्शी सर्वभूतहितरतो जन: स्वराट् इतिरूपेण वृतो भवेदिति आशय:।

## वैराज्यशासनम्

वैदिकोत्तरकाले विकसितेसु राजनैतिकव्यवस्थासु वैराज्यवाद: एकंविशिष्टंराजनैतिकदर्शनं विद्यते। वैराज्यमराजकात् परवर्ती राज्याच्च पूर्ववर्ती अवस्थेति पूर्वमेव स्पष्टीकृतम्। यत्र मानवानां चारित्रिकपतनमवलोक्य विद्वद्भिर्दुष्टान् नियन्त्रितुंविना राजानं हि दण्डनीते:

प्रशासनिकविधीनां प्रणयनं कृतम्। अस्य शासनविशेषस्यादिस्वरूपे शासक: नैव परिदृश्यते, किन्तु प्रशासनिकविधेरवस्थिति: संप्राप्यते।[१३२] एवमेव सर्वप्रथमेन अव्यक्तरूपेण नैसर्गिकशक्तिरेकासमाजं परिचालयति स्म। वैदिकसंहितासुवर्णितमृतं सत्यञ्च।[१३३] सा अव्यक्तशक्तिरिति विदुषां मतम्। श्रुत्यानुसारेण तपस: उत्पन्नात् पूर्वम् ऋतादेव समस्तब्रह्माण्डस्योत्पत्ति:, यत: सूर्य-चन्द्र-नदीसमुद्रकालादिनामुत्पत्तिरभूत्, यच्च सर्वेषां भौतिकानां तत्वानां नियन्त्रक: वर्तते।[१३४] "ऋतं सत्यं तपो राष्ट्रं...."[१३५] इति मन्त्रे ऋततत्वं सत्येन सह पर्यायवाचिरूपेणोपस्थापितमस्ति। एतदद्वयंनैसर्गिकसमाजस्य आधारत्वेन परिगण्यते। कैश्चित् वैदिकशोधकर्तृभि:[१३६] ऋतसत्ययोर्मध्ये सूक्ष्मभेद: विश्लेषित: -"शासने एक एव मुख्याधिकारी वर्तते, तथापि विविधानामन्येषां क्रमिकाधिकारिणामपि कार्यं भवत्यावश्यकम्। अनेनैव प्रकारेण कार्यसौकर्यार्थं समानार्थकयो: ऋतसत्ययोरपि भेद: उपर्युक्तो ज्ञायते"इति।परवर्तिकाले मात्स्यन्यायस्य प्रभावे समाज: उच्छृङ्खलित: जात:। तदा वैदिकविद्वद्भि: सम्भूयप्रशासनिको विधिर्निर्मित:। तत्विधिरेव वैराज्यव्यवस्था यत्र व्यक्तिविशेषस्य प्रशासनं नैव परिलक्ष्यते।

**वैराज्यशब्दस्यार्थ:**

वैराज्यमिति शासनप्रणाल्या: आलोचनात्पूर्वं वैराज्यमितिशब्दस्य विश्लेषणमत्र प्रस्तूयते। 'वैदिक परम्परा में राजनैतिकतत्वचिन्तन' शीर्षके ग्रन्थे आचार्यमहोदयेनपूर्वशोधकर्तृणां मतमनुसृत्य शब्दस्य व्याख्या एवं प्रस्तुता[१३७]-

१. विगतं राजकं वैराज्यम्। यत्र शासनपद्धति: राज्यव्यवस्था: च न भवति तदेव वैराज्यम्।

२. 'वि-राज्यम्' राज्यविहीनमिति।

३. विशेषेण राजते इति विराजं तस्य इदं वैराज्यम्। विशेषरूपेण अवस्थानं करोति राजते वा इति विराजं, तस्य स्वरूपं प्रकाश्यते इति वैराज्यम्।

वैदिकराजनीते: शोधकर्तृभिरपि वैराज्यशासनव्यवस्थाशासकविहीनं[१३८] लोकतान्त्रिकञ्च[१३९] विद्यते इति वर्णिता। यतोहि वैराज्यपदेन विशेषप्रकारस्य[१४०] शासनविधानम् निर्दिष्टम्, अत: अस्मिन् शासनप्रकारे शासका: 'विराट' इति पदेन उच्यते स्म। शासकवर्गरूपेण वैराज्यशासने जनसाधारणानां द्योतनं भवति।[१४१] अस्य शासनविशेषस्यावस्थानमैतरेयारण्यकानुसारेण हिमालयस्य पाददेशे उत्तरमद्र-उत्तरकुरूप्रदेशे निर्दिष्टमस्ति।[१४२] किन्तु यजुर्वेदस्य एकस्मिन्मन्त्रे भारतस्य दक्षिणदिशि[१४३] अस्य शासनविशेषस्यावस्थानं वर्णितमस्ति।

शासकविहीनराज्यव्यवस्थाया: उत्पत्तिविषये 'अथर्ववेदे राजनीति' इति शीर्षके ग्रन्थे विनायकरामचन्द्ररटाटे महोदयेन भणितं - "विगतं राट् यस्मादिति विराट्"।[१४४] तस्मात् विराज: उत्पन्नमिदं वैराज्यम्। 'वेदो में राजनीतिशास्त्र' इति शिर्षके ग्रन्थे कपिलदेवेन विराट्शब्दस्य द्वौ अर्थौ उल्लेखितौ।[१४५] प्रथमं 'वि-राज' अर्थात् विशेषेण ऐश्वर्येण सम्पन्न:, सार्वभौमशक्तिसम्पन्न: परमपुरूष: अथवा परब्रह्मसदृश:। द्वितीयस्तु 'वि-राज' राजारहित: शासकरहितो वेति।

अस्य विराट्शब्दस्य अर्थपरिशीलनेन अस्य महत्वं प्रभूत्वं वा स्फुटति। इदं विराडितितत्त्वं समस्तराजराज्ययो: नियन्त्रकस्वरूपम्। अत: अस्मिन्नर्थे विराट्शब्द: बहुवारं स्तूयते। पुरूषसूक्ते "ततो विराडजायत विराजो.."[१४६] इति मन्त्रे दैवीसिद्धान्तस्य राजतत्वमात्रस्यैव प्रतिपादनमस्तीति गवेषकाणां मतम्। तत्र 'विशेषेण राजते' इत्येवार्थो ग्राह्यो भवति। अथर्वसंहिताया: "विराड् वा इदमग्रमासीत्.."[१४७] इति मन्त्रे विराट्शब्देन राजाविहीनस्थिति विज्ञाप्यते। इह वा इति शब्दस्तु विकल्पार्थक:। वा इत्यनेन राज्ये स्थिते सत्यपि शासकविहीनस्थितिं ज्ञापयति। ऋग्वेदस्य पुरूषसूक्तेन अथर्ववेदस्य विराट्सूक्तेन च सृष्टेरादिकाले विराट्पुरूषेण चालितं वैराज्यशासनस्य प्रमाणं प्रस्तूयते।[१४८]

**वैराज्यशासनस्य स्वरूपम्**

वैराज्यशासनव्यवस्था पूर्णत: जनकल्याणकारिणी आसीत्। तत्रस्था: प्रजा: शासको विराट् वा प्रजानां राष्ट्रस्य च उत्तरोत्तरोन्नतेर्निमित्तं सदैव तत्परा: परिदृश्यन्ते। विराडितिवत् वैराज्यस्था: जना: अपि सर्वज्ञा: आसन्। धर्मानुसरणेन ते समाजव्यवस्था: सम्यग्रूपेण परिचालयन्ति स्म। तस्मिन्काले समाजसञ्चालनार्थं शासकस्य प्रयोजनं नैवानुभूयते। सैव वैराज्यावस्था। तत्कालीनराजनीतौ राजा-राज्य-दण्ड-दाण्डिकानाञ्च अभाव: परिलक्ष्यते। सर्वेजना: स्वज्ञानेन धर्मानुसरणेन परस्परं साहाय्येन रक्षिता: आसन्।[१४९] कदाचित् राष्ट्रस्थानां जनसाधारणानां दु:खादिकष्टमायाति चेत् वैराज्यगीतेन[१५०] तेषां दु:खकष्टप्रशमनस्य व्यवस्था: वेदेषु समुपलभ्यते।

परन्तु उत्तरवैदिकशास्त्रेषु आधिक्येन विषयोऽयं चर्चितम्। अस्य शासनविशेषस्य सामान्यवर्णनं वैदकसंहिताषु परिदृश्यन्ते। वैराज्यशासनस्य श्रुतिमूलकविषयोपरि चिन्तनावसरे बहूनि तथ्यानि अस्माकं पुरतो समायान्ति। तत्र ऋक्संहितायां शासनविधानरूपेण ‘विराट्’ ‘सम्राट्’[१५१] इति शब्दद्वयस्य प्रयोग: परिलक्ष्यते। श्रुत्यादिषु कुत्रचित् परब्रह्म द्योतनार्थं[१५२] विराट्शब्दस्य प्रयोगो विद्यते अन्यत्र कुत्रचित् दिव्यपुरूषं द्योतनार्थं[१५३] शब्दस्य पुनरावृत्ति: परिदृश्यते। अथर्ववेदे ‘वैराज्यं’ ‘विराट्’ इति शब्दयो: उल्लेखं प्राप्यते।[१५४] तत्र ‘विद्वांसं व्रात्यमिति’ उक्त्वा कठोरधर्माचरणेन दैवत्वं प्राप्तानां वैराज्यस्थनागरिकानामुल्लेख: संप्राप्यते।[१५५] पुनश्च कुत्रचित् उत्कृष्टलोकस्य विनिर्माता विराट्पुरुष: स्तुत:।[१५६] विराट्शब्द: मित्रावरूणयोर्निमित्तं प्रयुक्तस्य छन्दोरूपेण[१५७] एवं अधिराजरूपेण[१५८] चात्रोल्लेखित:। वस्तुतस्तु शासकविहीनवैराज्यशासने जनसाधारणा: पूर्णस्वाधीनतां प्राप्नुवन्ति स्म। साक्षात्कृतधर्माणां ऋषीणां ज्ञानात् प्रादुर्भूतायां प्रशासनव्यवस्थायामुन्नतेर्निमित्तं प्रगतेर्निमित्तं वा सर्वदा राष्ट्रस्था: जना: जागृता: दृश्यन्ते।

## वैराज्यव्यवस्था राज्यात्पूर्वमुत: परं वा

वैराज्यप्रशासनव्यवस्थाया: अवस्थाविषये संहिता: ब्राह्मणग्रन्था: प्रामाणिका: वर्तन्ते एव परन्तु राज्योत्पत्ते: पूर्वं वैराज्यस्यावस्थिति: आसीत् अथवा राज्यात् परमस्य विकाश: जात: इति विषये विद्वत्सु मतवैविध्यता परिलक्ष्यते। वैराज्यप्रशासनव्यवस्थां परिलक्ष्य पाश्चात्यविचारधारास्वीकुर्वाण: विद्वांस: State of nature इति वक्तुमिच्छन्ति, यत्र शासकस्य शासितस्य शासनव्यवस्थायाश्चाभाव: परिलक्ष्यते। तत्र जना: पशुवदाचरणं कुर्वन्ति। स्वच्छन्दं यौनाचारं, अनियन्त्रितविवाहव्यवस्था, पारिवारिकपरम्परायाश्च अभाव: तत्र परिलक्ष्यते[१५९] । परन्तु प्राच्यविचारधारायां वैराज्यावस्था एका उच्चस्तरीया प्रशासनव्यवस्था विद्यते यत्र 'ऋतमिति' तत्त्वं वैधानिकव्यवस्थाया: मूलरूपेण परिगण्यते। ऋततत्त्वस्य परिसर: प्रकृतेर्नीतिषु, तेषां जागतिकसम्बन्धेषु, मानवीय आचरणेषु विविधेसु रीतिषु चापि विस्तार्यते।[१६०] ऋततत्त्वं नैसर्गिक-दैवीशक्ते: नियन्त्रणस्य प्रतीको विद्यते।[१६१] इदं ऋततत्त्वमेव परवर्तिनिसमये 'धर्म' इति पदेन ख्यातम्।[१६२] अस्यैव धर्मस्य संरक्षणार्थं विराट्पुरूषस्योत्पत्ति: इति विदुषामभिप्राय:।[१६३]

अत: वैराज्यशासनव्यवस्था: उत्तमा: इति वक्तुं शक्यते। वैराज्यस्था: विराट्पुरूषा: धार्मिका: आसन्। अत: कुत्रापि अमंगलमत्याचारश्च नैव परिलक्ष्यते। वैराज्ये "अयं निज परो वेति" भावनानामभाव: परिलक्ष्यते।[१६४] सामग्रिकरूपेण सर्वेषामुन्नत्यर्थं सर्वे जना: तत्र कर्मरता: आसन्निति वक्तुं शक्यते।

वैराज्यशासने जनानामुत्कर्षं परिदृश्य राज्योत्पत्ते: परवर्तिनिसमये वैराज्यस्य विकाश: जात: इति वक्तुं शक्यते। ऐतरेयब्राह्मणेऽपि अष्टप्रकारस्य शासनक्रमे चतुर्थस्थाने वैराज्यस्यावस्थानं परिलक्षितम्।[१६५] किन्तु महाभारतस्य शान्तिपर्वणि वैराज्यस्यावस्थितेर्वर्णनं लङ् लकारेण प्रदर्शितं यत्र च कृतयुगे राज्योत्पत्तेर्पूर्वमेव वैराज्यस्योत्पत्तिरिति स्पष्टरूपेण

वर्णितम्।[१६६] वस्तुत: वैराज्यशासनव्यवस्था आदौ प्रचलितासीत्, परवर्तिसमये समाजे विशृङ्खलता जाता। पुन: राज्योत्पत्तेरनन्तरं विविधानां स्वराज्य-साम्राज्य-महाराज्य-जानराज्यादि-शासनविधानां सृजनं जातमिति ग्रन्थालोचनेन प्रमाणीयते।

## जानराज्यम्

जनानां राज्यमिति जानराज्यम्। जानराज्यस्योल्लेख: यजुस्संहितायां, तैत्तिरीयसंहितायां अथर्व संहितायां शतपथब्राह्मणे च संप्राप्यते।[१६७] राजसूययज्ञानुष्ठानसमये राजाभिषेकसमारोहे जानराज्यसंरक्षणनिमित्तं राज्ञ: वरणस्योल्लेखं यजुस्संहितायां संप्राप्यते। अस्य मन्त्रस्य व्याख्यायां महीधरेण[१६८]"जनराज्यायेन्द्रस्यैश्वर्याय यूयं सुवध्वं प्रेरयध्वम्" इति व्याख्याकृता। अत्र"यूयं प्रेरयध्वम्" इति अंशेन जनराज्यस्याधिपतिंनेतृत्वप्रदानार्थमिहबहुवचनस्य प्रयोग: इत्युच्यते। उवटेनापि[१६९]"सुवध्वमिति प्रत्येकेन सम्बन्ध:" इत्युक्त्वा प्रत्येकजनानां जानराज्ये सम्बन्धो भवेदिति व्याख्या कृता। शतपथब्राह्मणे"महते जानराज्यायेति, महते जनानां राज्याय"[१७०]इत्यनेन ब्राह्मणांशेन जनानां राज्यस्य जनसाधारणेन परिचालितस्य राज्यस्योल्लेखो वा संप्राप्यते।

### जानराज्यप्रशासनस्य स्वरूपम्

जानराज्यस्य शासकाधिपतिं जनराट् इति उच्यते। "त्वमेताञ्जनराज्ञो"[१७१]इत्यस्य मन्त्रस्यव्याख्यायां सायणाचार्येनजानराज्ञो इति पदं "जनानामधिपतिम्" इति उक्तम्। यजुस्संहितायां "जनराडसि रक्षोहा..."[१७२]इत्यनेन मन्त्रांशेन सुरक्षाप्रदातृ-पुरुषविशेषं जनराट् इति उक्तम्। अस्य मन्त्रस्यव्याख्यायां उवटेन[१७३] जनेषु रञ्जनं कुर्वाणं पुरुषविशेषं जनराट् इति उक्तम्। स: दुष्कृतिकारिणां भ्रष्टाचारिणां (राक्षसाम्) नाशं करोतीति भाव:। किन्तु महीधरेण "जनेषु यजमानेषु राजत इति जनराट्" इत्यनेन निर्वचनेन यजमानानां सुरक्षादातारं जनराट् इति उक्तम्।[१७४] परन्तु अथर्वसंहिताया:"त्वामेतां जनराज्ञो"[१७५] इति मन्त्रस्य व्याख्यायां

सायणाचार्येनजनानां भाटानां स्वामिन: 'जनराज्ञ:' इति उक्तम्। वस्तुत: 'जन' इति पदं यद्यपि भाट्-यजमानानांबोधकत्वेनेह प्रयुक्तं तथापि तस्य वास्तविक: अर्थस्तु जनसाधारणएव इत्यभिहितम्।

एतदुल्लेखनीयं यत् वैदिकलोकतान्त्रिकप्रशासने पुरोहिता: राष्ट्रकल्याणार्थे विकाशार्थे वा सदैव जागृता: परिदृश्यन्ते।[१७६] तेजनसाधारणेषु क्षात्रतेजस: सञ्चारं कुर्वन्त: धनसम्पदमैश्वर्यञ्च प्रयच्छन्ति।[१७७] एवं प्रकारेण प्रत्येकव्यक्तीनां व्यक्तिगतोन्नतिद्वारा लोकतान्त्रिकराष्ट्रं विकाशपथे नेतुं पुरोहिता: सदैव कर्मरता: दरीदृश्यन्ते।[१७८]पुरोहिता: ज्ञानदीप्ता: भवन्ति। अशिक्षितेन अज्ञानिना विवेकहीनेन समाजेन न कदापिसमाजस्योन्नति: साध्यते। अत: शिक्षितै: पुरोहितैर्वा समृद्धं भवेत् जानराज्यमिति काम्यते स्म।[१७९]

**जनराज्यस्थानां जनानां राजनैतिकाधिकार:**

१. वैदिकलोकतान्त्रिकप्रशासने शासकस्य चयनं जनसाधारणै: संभवति स्म। अत: जनसाधारणा: राजनैतिकशक्तेर्मूलरूपेण परिगण्यन्ते। तत्कालीनराजनीतौ राष्ट्रजना: सत्यवादिन:आसन्।[१८०] तेषां राष्ट्रजनानां नागरिकाणां वा समर्थनेनैव शासका:जनकल्याणकार्ये शासनकार्ये वाप्रेरिता: भवन्ति स्म।[१८१]

**२.** वैदिकनागरिकाणां राजनैतिकाधिकारं प्रदर्शयितुं सभासमितिइतिसंज्ञकयो: द्वयो:संस्थाविशेषयोरुल्लेखं कर्तुं शक्यते। यद्यपि "समिति" इति संस्थायां विशिष्टानां व्यक्तिनामेवान्तर्भूक्तिरासीत् किन्तु "सभा" इति संस्थाविशेषे सर्वेषां साधारणजनानामपि प्रवेशस्य प्रमाणमुपलभ्यते। सभा इति संस्थाविशेषं "ग्रामसभा" इत्यनेनापि ज्ञायन्ते स्म। यत्र साधारणानां ग्रामवासिजनानामपि अन्तर्भुक्ति: आसीत्।

सभा इति संस्थाविशेषे समागत्य तेवैदिकनागरिका: क्रमानुसारेण स्व-स्वाभिमतं प्रकटयन्ति स्म।[१८२] तदनन्तरं सर्वेषां सम्मतेरनुसारेण निर्णयं गृह्यते स्म।[१८३]

३. जानराज्यप्रशासने जनराट् इत्यस्य शासनकालसमाप्ते जाते सति अन्यस्य शासकजनस्यागमनात्पूर्वं यत्कालावधिर्भवति तत्र जनसाधारणा हि: शासनव्यवस्थां संरक्ष्यन्तीति प्रोच्यते।[१८४]

अस्याध्यायस्य निष्कर्षरूपान् कतिचित् विन्दुन् उपस्थाप्यतेऽत्र –

१. विश्वराजनीतौ सर्वप्राचीनशासनविधानत्वेन वैराज्यव्यवस्था स्वीकृता। वैराज्यस्य लोकतान्त्रिकादर्शानां क्रमागतह्रासात् स्वराज्य-जानराज्यादिशासनविधानामुत्पत्ति: जाता।

२. साधारणत: स्वराज्येति शासनविधाया: अवस्थानं जनजाति-वसतिपूर्णस्थाने एव संप्राप्यते।

३. जानराज्यशासनविधौ जनसाधारणानां राजनैतिकाधिकार: सर्वदा सुरक्षिता: आसीत्। प्रजासंरक्षण-संवर्धनदिशि जानराज्यस्योत्कृष्टता श्रुतिषु सर्वत्र प्रशंसिता। किन्तु दाशराज्ञयुद्धे सम्राड्भि: अनेकानां जानराजां पराजयस्य गाथापि श्रुयते। वस्तुत: सामरिकशक्ते: सांगठनिकशक्तेश्च अभावेन जानराज्यशासनविधाया: पतनं जातमिति प्रतिभाति।

**उपसंहार**

एवं क्रमेण तृतीयाध्यायस्य प्रारम्भे शासनतन्त्रस्योद्भवस्य कारणस्वरूपाणां विविधसिद्धान्तानां (शक्तिसिद्धान्त-अनुबन्धनसिद्धान्त-विकाशवाद-अराजक-वैराज्य-प्रभृतिसिद्धान्तानां) अवस्थिति: यथाशास्त्रमुपस्थापितम्। राजनैतिकविद्बद्भि: विश्वराजनीतेरध्ययनादनन्तरं तस्योद्भवस्य कारणरूपा: इमे सिद्धान्ता: प्रदर्शिता:। एतेषां मतवादानां समर्थनं कर्तुं व्याख्यातुं वा वेदादिशास्त्रे अनेकानां तथ्यानां आख्यानोपाख्यानानां अवस्थिति: परिलक्षिता। वैदिककालीनराजनीत्यां लोकतन्त्रस्यावस्थानविषये द्वितीयाध्याये आलोचित:। अस्मिन् तृतीयाध्याये लोकतन्त्रस्य विविधप्रकारकाणां शासनविधानां वर्णनं समुपस्थापितम्।

लोकतान्त्रिकप्रशासनस्य विविधप्रकारकाणां शासनव्यवस्थानामुपस्थिति:

वैदिकलोकतन्त्रे प्रत्यक्षीक्रियते। तत्र प्रत्यक्षपरोक्षरूपयो: मतदानपद्धत्योरपि अवस्थिति: प्रत्यक्षीक्रियते। ग्रामण्यनियुक्तिविषयेप्रत्यक्षपद्धत्या: मतदानव्यवस्था, स्वराट्-जनराट्-इत्यनयो: वरणसमये परोक्षपद्धत्या: मतदानव्यवस्थाश्च विकशितासीत्। तत्कालिनशासननीत्यां विविधक्षेत्रे सुयोग्यपुरूषाणां नियोजनं, नीतिनिर्धारणे सहयोगग्रहणं च परिलक्ष्य वैदिककाले संसदीयव्यवस्थाया: अवस्थिति: अनुमातुं शक्यते। कुत्रचित् शासकजनं 'राष्ट्रपति:'[१८३] इति पदेनोच्चारणं, कतिपयनीतिनां निर्धारणे तस्य प्राधान्यताञ्च परिलक्ष्य राष्ट्रपतीयप्रशासनस्यापि अवस्थिति: आसीदिति वक्तुं शक्यते। पुनश्च वर्तमानलोकतन्त्रपद्धत्यांयासां विविधप्रकारकाणां शासनव्यवस्थानां विकाश: जात: तासां सर्वाषामेव आदर्शानामवधारणानां चावस्थिति: वैदिकलोकतान्त्रिकप्रशासने विद्यमानासीदिति प्रमाणपूर्वकं वक्तुं शक्यते।

अस्यामालोचनायां वैराज्य-स्वराज्य-जानराज्यादिशासनविधानां लोकतन्त्रात्मकताया: वर्णनादनन्तरं तेषु शासनविधेषु लोकतान्त्रिकादर्शानामवस्थानं, तेषामादर्शानां फलवतीकरणस्य नीतयश्च इह अन्तर्भुक्ता:। कालक्रमेण एतानि लोकतान्त्रिकप्रशासनस्य विविधानि विधानि कस्यापि एकस्य स्थानविशेषस्य स्थायीशासनपद्धतिरूपेण परिणतम्। यथा उत्तरकुरूप्रदेशे वैराज्यशासनम्, कच्छ-वृष्णि-अञ्चले भौज्यशासनम्, मगध-कलिङ्ग-वङ्गप्रदेशे साम्राज्यशासनम्, सुराष्ट्र-सौवीरप्रभृति-अञ्चले स्वराज्यशासनम्, कुरुपाञ्चालस्य मध्यभागे राज्यव्यवस्था, ऊर्धभागे पारमेष्ठ्यशासनविधानमासीत्। जानराज्यमिति शासनविधस्यावस्थिति तु श्रुतिषु बहुवारं चर्चितं किन्तु तस्या: शासनविधाया: स्थायीस्थानविशेषस्योपस्थितिविषये नैवोपलभ्यते तावत् सुदृढं तथ्यम्। किन्तु कैश्चित् पण्डितै: जनजातीयाञ्चले जानराज्यस्योपस्थितिविषये स्वाभिमतं प्रकटितम्।

वैदिकसमाजस्य जनजाति इत्यनेन ब्राह्मण-क्षत्रिय-वैश्य-शूद्रातिरिक्तानाम् अनु-द्रुह्यु-यदु-तुर्वशु-राक्षस-पिशाच-प्रभृतिजनसमूहानां बोधो जायते। यद्यपि कुत्रचित् व्यवस्थितजीवनं यापयन्तं जनसमूहमार्यत्वेन, सामाजिकव्यवस्थात: शिक्षा-संस्कृतेश्च दूरं गतं

जनसमूहमनार्यत्वेनाभिहितम्। आर्यानार्यनिर्धारणे या कापि भित्ति: स्यात्,अनार्यसंज्ञकानां जनसमूदायानां बृहत्तरवैदिकसमाजसंघट्टने महत्तरभूमिका तु नैव अस्वीकर्तुं शक्यते। वैदिकसमाजे म्लेच्छ-द्रुह्यु-पुरू-पिशाच-प्रभृतिषु अनुन्नतजनसम्प्रदायेषु जानराज्यसंज्ञकस्य शासनविधानस्यावस्थिति: अध्यायेऽस्मिन्नालोचिता। वैदिक स्वराज्यशासनव्यवस्था अपि जनजातीयाञ्चले प्रचलनस्य प्रमाणं समुपलभ्यते। वर्तमानकालिक-लोकतान्त्रिकप्रशासनेऽपि जनजातीयाञ्चले स्थानीयस्वायत्तशासनस्यावस्थिति: परिलक्ष्यते। यथा जनजातीयानां स्वार्थरक्षानिमित्तं सर्वाङ्गिणोन्नतेर्निमित्तं च केन्द्रियप्रशासकेन स्वायत्तशासनव्यवस्था प्रचलिता। तथैव वैदिकलोकतान्त्रिकप्रशासनेऽपि अनुन्नत-जाति-जनजातीनां विकाशार्थं तान् ता: वा अव्यवस्थितावस्थात: सुव्यवस्थां प्रति आनेतुम् आर्यत्वेनोपस्थापयेतुं वा शासक: सदैव सचेष्ट आसीत्। वस्तुत: आर्य अनार्य: इति तु जनविशेषाणां जीवनधारणस्य व्यवस्थिताव्यवस्थितरूपभेद एव इति।